# ॥ श्रीभ्रमराम्बाष्टकम् ॥

श्रीकण्ठार्पितपत्रगण्डयुगलां सिंहासनाध्यासिनीम्
लोकानुग्रहकारिणीं गुणवतीं लोलेक्षणां शाङ्करीम् ।
पाकारिप्रमुखामरार्चितपदां मत्तेभकुम्भस्तनीम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥१ ॥

विन्ध्याद्रीन्द्रगृहान्तरे निवसितां वेदान्तविद्यानिधिम्
मन्दारद्रुमपुष्पवासितकुचां मायां महामायिनीम् ।
बन्धूकप्रसवोज्ज्वलारुनणिभां पञ्चाक्षरीरूपिणीम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥२ ॥

माद्यच्छुम्भनिशुम्भमेघपटलप्रध्वंसझञ्झानिलाम्
कौमारीं महिषाख्यशुष्कविटपीधूमोरुदावानलाम् ।
चक्राद्यायुधसंग्रहोज्ज्वलकरां चामुण्डिकाधीश्वरीम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥३ ॥

दृक्कञ्जातविलासकल्पितसरोजातोरुशोभान्विताम्
नक्षत्रेश्वरशेखरप्रियतमां देवीं जगन्मोहिनीम् ।

रञ्जन्मङ्गलदायिनीं शुभकरीं राजत्स्वरूपोज्ज्वलाम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥४ ॥

केलीमन्दिरराजताचलतलां सम्पूर्णचन्द्राननाम्
योगीन्द्रैर्नुतपादपङ्कजयुगां रत्नाम्बरालङ्कृताम् ।
स्वर्गावाससरोजपत्रनयनाभीष्टप्रदां निर्मलाम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥५ ॥

संसारार्णवतारकां भगवतीं दारिद्र्यविध्वंसिनीम्
सन्ध्याताण्डवकेलिकां प्रियसतीं सद्भक्तकामप्रदाम् ।
शिञ्जन्नूपुरपादपङ्कजयुगां बिम्बाधरां श्यामलाम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥६ ॥

चञ्चत्काञ्चनरत्नचारुकटकां सर्वंसहावल्लभाम्
काञ्चीकाञ्चनघण्टिकाघणघणां कञ्जातपत्रेक्षणाम् ।
सारोदारगुणाञ्चितां पुरहरप्राणेश्वरीं शाम्भवीम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥७ ॥

ब्रह्मर्षीश्वरवन्द्यपादकमलां पङ्केरुहाक्षस्तुताम्

प्रालेयाचलवंशपावनकरीं शृङ्गारभूषानिधिम् ।
तत्त्वातीतमहाप्रभां समयिनीं दाक्षायणीं भैरवीम्
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥८ ॥

भ्रमराम्बा महादेव्या अष्टकं सर्वसिद्धिदम् ।
शत्रूणां तु नराणां च ध्वंसनं तद्ददाम्यहम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]